Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 3 | ISSN : 2581- 6306

# नैयायिकानां मते लकारार्थ निरुपणम्

**डॉ. सुभाषचन्द्रमीणा**
**सहायकाचार्यः (व्याकरण विभागे),**
**केन्द्रीयसंस्कृत विश्वविद्यालय,**
**क. जे. सोमैया परिसर,**
**विद्याविहार, मुम्बई, भारत।**



**Article Info**
Volume 4, Issue 3
Page Number : 10-15
**Publication Issue :**
May-June-2021
**Article History**
Accepted : 25 May 2021
Published : 02 June 2021

**सारांशः**—स्वर्गकामो यजेत इति आदि प्रवर्त्तना विषया यागकरणिका स्वर्गकर्मिका भाव न इति बोधस्य परैरम्युपगमात् प्रवर्त्तना विषयत्वम् अत्रा ज्ञानात् । प्रवृत्ति अनुपपत्तेक रावश्यकस्वर्गसाधनत्वात्—आदिज्ञानात् एव तत्र प्रवृत्तेः । अयं भावः — सद्योजातस्य शिशोरिदं ज्ञानं न भवति—''अयं मां दुग्धपाने प्रर्वतयति इति'' एवञ्च प्रवर्तना ज्ञानाभावे प्रवृत्तिः न स्यात्, किन्तु दृश्यते च प्रवृत्तिस्तेषामपि । एवं तिरश्चामपि लिङ्गादिश्रवणं तज्ज्ञानं च दुर्लभम् । अतः इष्ट साधनताज्ञानं प्रवृत्तौ कारणं मन्तव्यम् ।

**मुख्यशब्द :—** नैयायिकानाम्, लकारार्थ, ज्ञानात्,विषया, वाचकः, सिद्धान्तः।

## प्रस्तावना

लकारसामान्यार्थे निरुपिते तद्विषयक जिज्ञासानिवृत्तावरयवक्तव्यत्व ज्ञानाद्विशेषार्थनिरुपणेऽवसरस्य सघ्गतित्वं सूचयन्नाह—प्रत्येकमिति । तार्किकै स्थानिनः एव वा न तु आदेशाः लाघवात् इति प्रतिपादितस्य सिद्धान्तस्य खण्डनपुरस्सरं लोके अर्थविषयकबोधजनकः एव वाचकः तादृशवाचकत्वं तु उच्चारितशब्दस्यैव इति रीत्या आदेशानाम् (उच्चारितानाम्) वाचकत्वं प्रतिपादयन् नागेशः कर्त्तृवाच्यकर्म्मवाच्ययोः व्यापारपफलप्राधान्यनिदर्शकं शाब्दबोधं प्रदर्शयति ।

यद्यपि लकाराणामेवार्थनिरुपणं ताकिकैः कृतम्, तथापि उच्चारित एव शब्दोऽर्थ प्रत्यायको नानुच्चारित इति भाष्याल्लोके तथैवानुभवाच्च तदादेशतिङामर्थो निप्यते ।

**वर्तमाने परोऽक्षे श्वो भाविन्यर्थे भविष्यति ।**
**विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया तडादयः ।।वै.भू.।।**[1]

लडादयष्टितः षट् क्रमेणेषु अर्थेषु दृष्टव्याः । तथाहि—वर्तमानेऽर्थे लट्, 'वर्तमाने लट्' (पा.सू. 3/2/123)[2] इत्यादि विधयक सूत्रेण लड्लकार स्यात् । तत्र संख्याविशेष—कालविशे—कारकविशेष भावालादेशमात्रस्यार्थाः । तथाहि—लडादेशस्य वर्तमानकालः, शबादिसमभिव्याहारे कर्ता, यक्चिण् समभिव्याहारे भाषकर्म्मणी, उभयसमभिव्याहारे एकत्वादिसंख्या चार्थः । उक्तं च

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**फलव्यापास्योस्तज पफलोतघ्यविचणादयः**
**व्यापारे शप्श्नमाद्यास्तुद्योतयन्त्याश्रयान्वयम् ।।वै.भू.।।[3]**

फलव्यापारयोरिति । मध्ये इति शेषः । धातुः उपस्थाप्ययोः फलव्यापारयोर्मध्ये तङादयः फले आख्यातार्थश्रयान्वयं द्योतयन्ति शबादयश्च व्यापारे आश्रयान्वयंव्यञ्जनया बोध्यन्ति तिङ्र्थकारके । विशेषमिति । समानप्रत्ययोपात्तत्वादिति भावः । दीक्षितादिमते कत्र्र्थकतिङ्समभिव्याहारे तिङ्र्थसंख्या कर्तरि विशेषणम्, कर्मार्थकाख्यातसमभिव्याहारे च कर्मणि विशेषणमिति निष्कर्षः ।

नैयायिकानां मते सङ्क्षेपात् लकाराणामर्थो निरुप्यते लट् लिट्, लुट्, लृट्, लोट, लङ्, लुङ्, लृङ् एषु पञ्चमो लकारश्छन्दोमात्रागोचरः ।।[4]

तत्रा लडादि लृङन्ता दश लकाराः । तत्र लकारस्य अर्थः कर्ता, कालः, संख्या चेति त्रयाः । तत्र कर्ता इति पातञ्जलाः ।

''लः कर्मणि च भावे चाकर्मकेम्यः'' (पा. सू. 3–4–69)[5] अकर्मकेभ्यो धातुभ्यो भावे कर्तरि च सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि लः भवन्ति । अर्थात् इति सूत्रो चकारेण कर्तुः परामर्शात् । कर्तृ स्थाने व्यापार इति मीमांसकाः स्वीकुर्वन्ति । यत्न इत्यस्य कर्तृस्थाने भाव इति नैयायिकाः, अर्थात् वैयाकरणा आख्यातस्य कर्तृस्थाने भाव इति नैयायिकाः, अर्थात् वैयाकरणा आख्यातस्य कर्तृअर्थकत्वं स्वीकुर्वन्ति, भट्टानुयायिनो मीमांसकास्तस्य कर्तृअर्थ व्यापारार्थकत्वं स्वीकुर्वन्ति । नैयायिकाश्च यत्नार्थकत्वं उरीकुर्वन्तीति निष्कर्षः । व्यापार ताद्यपेक्षया लाघवेन यत्नत्वस्यैव शक्यतावच्छेदकत्वात् । कृतौ शक्तौ व्यवस्थापितायां तिप्त्वादिकं न शक्ततावच्छेदकम् गौरवात्, किन्तु सर्वलकारसाधारणं तत्वमेव, तच्च जातिरुपमित्याशयेन । भवति इत्यादौ चादेशेनादेशिनो लस्यैव स्मरणादन्वयधी, अर्थात् स्थानितः शाब्दबोध इतिभावः । नैयायिकाः स्थानिभूत लकारेषु एव शक्तिं स्वीकुर्वन्ति, आदेशेषु च तां स्मृत्वार्थबोधम् उपपादयन्ति इति बोध्यम् । नैयायिकैः स्थानेषु एव शक्ति स्वीकारात् इति भावः ।

**''चैत्रो गन्ता गतो ग्रामः''[6] इत्यादौ**

समानाधिकरण्यानुरेधेन यथा यथं कर्तृर्मणी कृत वाच्ये । न चैवं ''लटः्शदृशानचौं'' (पा.सू.3–12–124)[7] इति अनेन शदृशानश्च आदेत्वात कथं कर्तरि शक्तिः, आदेशिशक्त्या निर्वाह एव आदेशशक्तियकल्पनात् । चैत्रः 'पचति' इत्यादौ सामानाधिकरण्यानुरोघादादेशिश– क्त्याऽनिर्वाहाद् अत्रादेशेऽपि शक्तिः ।

नैयायिकमते विशेषतां दर्शयति – इयानिति । आत्मनेपद प्रत्ययस्थले लत्वेन यत्नस्यबोधः, आत्मनेपदत्वेन फलस्य बोधः । गमनजन्येति । अत्र गमनपदे संयोगारव्य फलजनको व्यापारो विवक्षितः फलपदेन च संयोगरुपं फलमिति बोध्यम् । विशेष्यविशेषण भाव इति ।

'गामंगच्छति मैत्र'[8] इत्यत्र तु ग्रामवृत्ति फलजनक गमनानुकूलकृति मान्मैत्र इति बोधः। फलं च द्वितीयार्थः । जनकत्वं संसर्गः । ग्रामश्चात्रा फलेविशेषणम्, तद् गमने, तच्च कृतौ, सा मैत्रे इति विशेष्य विशेषण भाव भेदेनैव कर्मकर्तृस्थलीय बोधयोर्विशेषः । मैत्रेण ज्ञायते, इष्यते, क्रियते घट इत्यादौ तु वृत्तिस्तृतीयाया, विषयता त्वाख्यातस्यार्थः । मैत्रवृत्ति ज्ञान विषयो घट इति बोध । घटं जानाति मैत्र इत्यादि तु विषयता द्वितीयायाः आश्रयत्वं चाख्यातस्यार्थः । घट विषयक ज्ञानाश्रयो मैत्र इति बोधः ।

नैयायिकमतानुसारं कालश्चातीतर्क्तमानानागतात्मा यथायथं लडादेरर्थः । लटः भवति इत्यादौ वर्तमानत्वं, लङ्लुङ्लिटाम् अभवत् अभूत् बभूव इति आदौ भूतकालः लुड्लृटोर्भविता भविष्यति इति आदौ भविष्यत्कालः । लिङ्लोङ् लेटां भवेत् भवतु (आग्नेयोष्टाकपासो भवति इति आदौ विधिः ।)

लेटस्तु छन्दस्येव प्रयोगः ।[9] तत्र दीर्घत्वमपि विकल्पेन, भवति भवाति इति दर्शनात् । तत्र व्यापारादि बोधकेन लटा वर्तमानत्वं व्यापारादावेव बोध्यते । पचति इत्यत्र वर्तमान पाकानुकूल व्यापारवान् इति बोधात् । एवमन्यत्रापि ।

व्यापारबोधकज्ञाधात्वादिसमभिव्याहृताख्यात जन्मवर्त्तमानत्वप्रकारकबोधे तु तादृशधातुजन्योपस्थितिः हेतुः । कार्यताकारणतावच्छेदिका च प्रत्यासत्त्या विषयतैपेति नाति प्रसंगः । जानाति इच्छति, यतते इत्यादौ वर्तमानत्वाश्रयज्ञानाश्रयत्वादि बोधस्य– वानुभविकल्वात् ।

तत्र लटा शक्त्या वर्त्तमानत्वं लक्षणयाडऽक्षयत्वं बोध्यत इति विशेषः । लटा स्वाधिकरणकाल उपाधिस्पन्द एव वर्त्तमानः प्रति अय्यते । वर्त्तमानसमीप्ये विहितेन तु स्वाधिकरण समीपवर्त्ती तादृशकालः । तत्र अपि शक्तिः लक्षणा वेति अन्यत् एवत् ।

आख्यातोपस्थितयोः कृतिवर्तमान्वयो कथं मिथोऽन्वयः, यतोहि जन्यशाब्दबोधे पदान्तरजन्योउपस्थिति हेतुत्वात् । कार्यतावच्छेदिका च प्रत्यासत्तिः प्रकारता । कारणतावत् छेदिका च विशेष्यतेति । अन्यथा हरिपदार्थयोः, दण्डेन इति आदौ च करणत्व एकत्वयोर्मिथोऽन्वयापत्तेः मैवम् ।

घटो नश्यति इति आदौ वर्त्तमानः उत्पत्तिकत्वं प्रतियोगित्वं च लडर्थः । आद्यं नाशे प्रकारः द्वितीयं घटे प्रकारः । वर्त्तमान उत्पत्तिक नाशप्रातियोगी घट इति बोधस्य अनुभविकत्वात् । अत्र च वृत्तिद्वयस्य युगपद्बोध्कत्वं सर्वेरेष्वितव्यम् । धात्वर्थस्य नाशस्य घटे प्रतिपदिकार्थे साक्षात् अन्वय असम्भवात् । न च प्रतियोगित्वं एव अर्थो अस्तित्व इति वाच्यम्। चिरनष्टेऽपि नश्यति इति प्रसंगात् ।

एतेन अत्र वर्तमानत्वात् नश्यति इति प्रयोगापति इति भावः । केचित् अत्र लत्वमेव प्रतियोगित्वस्य वृत्तिवच्छेदकं तटत्वं तु तादृश उत्पत्तिकत्वस्य । एवञ्च प्रतियोगित्वे लस्य लक्षणा, वर्त्तमानोत्पत्तिकत्वे तटः शक्तिः इति । ननु युगपद्वृत्ति द्वय विरोध अत आह एकधर्मेति । भिन्न भिन्न धर्मावच्छिन्नस्य वृत्तिद्वस्य युगपदबोधे न किमपि बाधकमिति ।

तिङ्न्तेन क्रियाविशेष्यको बोध इति वैयाकरणाः भाट्टाश्च । वैयाकरणमते घात्वार्थः व्यापारेव ।[10] चैत्रः तण्डल पचति[11] इत्यादि । मीमांसकमते क्रिया प्रत्ययार्थः । चैत्रीयपाककरणिव । तण्डुलकर्मिका भावनेति बोधः । वैयाकरणमते विशेष्यक एव बोधः । आदेन कर्मक पाकानुकूलकृतिमांश्चेत्रा इति बोध इति नैयापिकाः । मीमांसका मते कर्मकरणत्वादे क्रियायामेव सर्वमतेऽन्वयः ।

लङ्स्तु अर्थः घ्योऽनद्यकालः । लुङ्स्तु अर्थः भूतसामान्यम् । भूतत्वं च वर्तमानध्वंस प्रतियोगी उत्पत्तिकत्वंम्, न तु तादृश प्रतियोगित्वमेव लिटस्तु अर्थः भूतकाल इव परोक्षत्वम् । यतोहि अहंचकार इत्यादि प्रयोगादर्शनात् ।

न तु चैवं ''णलुत्तमो वा'' (पा.सू.7/1/91)[12] इति ज्ञापकात् उत्तमपुरुषस्तत्र स्यात इति वाच्यम् । अयं भावः उपर्युक्तसूत्रः उत्तमपुरुषे णल् स्थाने विकल्पेन णिति । यदि परोक्षता कारणेन उत्तमपुरुषस्य प्रयोग असम्भव चेत णिति निरर्थका तथा च ज्ञापकात् यत् उत्तमपुरुषे अपि लिट रुपात् ।

यथा–'सुप्तोऽहं किल विललाप' 'मत्तोऽहं कित विचचार'[13] इति आदौ चित्तविक्षेपादिना पारोक्ष्यं उपपाद्य तत्र सूत्रास्य सार्थस्य सम्भवात् । तत्रा परोक्षत्वेन पारोक्षी सादृश्ये तात्पर्यम् । 'चक्रेसुबन्धुः' इति अत्र तु लिट्प्रयोगो नास्ति, अपितु तिङ्न्तप्रतिरुपको निपातः ।

लुट् लृटोस्तु अर्थे भविष्यकालः । भविष्यत्वं वर्तमानप्रागभाव प्रतियोगी उत्पत्तिकत्वम्। उत्पत्तौ च देश विशेषः कालविशेष च अधिकरणत्वं रूपेण अन्वेति । यथा–'गृहे घटो भविता'[14] 'गृहे अय घटो भविष्यति' इत्यादौ धातुनोत्पत्ति प्रत्याय्यते, वर्तमानप्रागभाव प्रतियोगित्वम् आश्रयत्वं च प्रत्ययेन । यतोहि गृहाधिकरण– वर्तमानप्रागभावप्रतियोगी उत्पत्ति आश्रयः घटः । अद्यतन प्रागभाव प्रतियोगी उत्पत्ति आश्रयः घट इति अन्वय बोधत् । वर्तमानप्रागभाव प्रतियोगित्वंमात्रास्य लुटादि अयं भविष्यति । श्वो गृहे समुत्पद्य परश्वैः प्रांगणं गमिश्यति मैत्रे परश्वः प्रांगणे मैत्रो भविष्यति इति प्रसंगः ।

वर्तमानलिकोः य भाविनीक्रियाया अभावः, तत्प्रतियोगिनी उत्पत्तिर्यस्य सः तत्त्वम् । श्वोभावि नाशके इति । श्वो भावी नाशः यस्य स बहुव्रीहो कय्–श्वो भावि नाशकः, तस्मिनित्यर्थः ।

केचित् तु देशविशेषः कालविशेषः च भाविनीक्रियाया अभावः प्रतियोगिनी अन्वेति । परश्वः प्रांगणे मैत्रो भविष्यति इत्यस्य परश्वोवृतिः प्राङ्गणवृत्तियः प्रागभावः तत्प्रतियोग्य उत्पत्त्याश्रयः प्रांगणवृत्तिर्यः मैत्र इति बोधः । तेन न उक्तातिप्रसंगः । एतेन श्वोमाविनि घटे अद्य भविष्यति इति प्रसंगे निरस्त इति आहूः ।[15]

नंक्षयति इति आदौ वर्तमान प्राग भावप्रतियोगी उत्पत्तिकत्वं प्रतियोगित्वं च प्रत्ययार्थः। श्वो घटो नक्षत्रयति इति आदौ श्वः वृत्तिः वर्तमान प्रागभाव प्रतियोगिनीः उत्पत्तिः तदाश्रयनाशप्रतियोगी घटः इति अन्वयः बोधः । यतु अत्र वर्तमानप्रागभावप्रतियोगित्वं एव प्रत्ययार्थ इति, तन्न । श्वोभविनाशके घटः नंक्ष्यतीति प्रसंगात् ।

पक्ष्यतीति[16] आदौ आद्यपाकव्यक्तिप्रागभावगर्भमेव भविष्यत्त्वम्, पक्ववानिति आदौ चरम पाकव्यक्ति ध्वंसगर्भमेव भूतत्वं भासते । तत्तः समभिव्याहारस्य तादृशबोधे हेतुत्वात् तेन पाकमध्ये कस्याश्रित् पाकव्यक्तेरनुत्यादेऽपिक कस्यश्चित्दतोतत्वेऽपि न पक्ष्यति पक्ववानि नित्यादिप्रयोगः ।

अयं भावः यथा यत्किश्चिद् व्यापारे प्रारध्वे यत्कश्चिद् व्यापारेऽवशिष्टे सत्यपि पचति इति प्रयोगः भवति तथैव कस्याश्चिद् पाकव्यक्तेरनुत्पादे 'पक्ष्यति' इति कस्याश्चिद् इतित्वे च पक्ववानित्यादि प्रयोगापत्तिः । एतद्वारणाय च तत्तत् क्रियासमभिव्याहारस्यैव तादृशबोधे हेतुत्वं बोध्यम् । एवञ्च आद्यपाकप्रागभावबोधे पच् धातुः उत्तरस्य पदसममिव्याहारज्ञानस्य चरमपाक प्रध्वंसाभावबोधे च तद् धातुउत्तरक्तक्तवत्वादि समभिव्याहारज्ञानस्य कारणस्य कल्पनान्न दोष इति ।

लिङ्लकारस्यार्थः विधिराशीशः । यजेत इत्यादिना विधिः लिङ्लकारस्ति । भूयात् इत्यादिना आशीस्तु । सा च आशीः–शुभाशंसनं, तद् हाच्छति यावत् । लोटस्तु विधिः अनुभतिर्वा । यथा–'गच्छतु' इत्यत्रा अनुमति विषय गमनानुकूल कृतिमानिति बोधस्यानुभविकत्वात् ।

विधिः प्रवर्तन् इति मीमांसकाः ।[17] लिंगनिष्ठो व्यापारः पदार्थान्तरम्, लिङ्गपदज्ञानमेव वा । तस्य प्रवर्त्तनात्वेन ज्ञानं शब्दाः अधीनप्रवृत्तौ कारणम् । लिङ्गश्रवणे आचार्यो मां प्रवर्तयति इति ज्ञानाद गवानयनादौ प्रवृत्तेः । आचार्य निष्ठा प्रवर्त्तनात्वभिप्राय– विशेष एव इति आहः । अयं भावः

शुभविषयिणीच्छा मीमांसकादिमते । लिङ्गनिष्ठ अत्र वेदापेक्षया इदम्। वेदस्यापौरुषेयत्वेन तत्र आचार्यभावात् शब्दनिष्ठैव प्रवर्तना । ननु शब्दनिष्ठः प्रवर्तनापरपर्यायः कः असौ व्यापार इत्यत आहपदार्थात्तरमिति । आर्थी भावनारुपप्रसिद्धव्यापार विलक्षणम् इत्यर्थः, विलक्षण्यञ्च शब्दनिष्ठत्वात् । ननु अप्रसिद्धस्य विलक्षणव्यापारस्य कल्पने गौरवम्, लोके आचार्यविनिष्ठा प्रवर्तन इति अननुगमश्चेति इति आह–लिङ्गपदज्ञानमेव प्रवृत्तिहेतुत्वेनेत्यर्थः । अयं भावः–प्रवर्तना अत्वेन एव ज्ञानस्य प्रवृत्तिं प्रति कारणत्वान्न लोकवेदयोरननुगम्? लिङ्गश्रवणे अत्र अयं मां प्रवर्तयति इति प्रतीसाक्षिकस्य प्रवर्तनात्वस्य आज्ञादिषु एव शब्दव्यापारेऽपि सत्त्वादिति बोधयम् ।

तत् न । स्तनपानादि प्रवृत्ताविष्ठसाधताज्ञानस्य हेतुताया आवश्यकत्वात् तत् एव उपपत्तौ प्रवर्तना ज्ञानस्य हेतुत्वे भानाभावात् । स्वर्गकामो यजेत इति आदि प्रवर्त्तना विषया यागकरणिका स्वर्गकर्मिका भाव न इति बोधस्य परैरम्युपगमात् प्रवर्त्तना विषयत्वम् अत्रा ज्ञानात् । प्रवृत्ति अनुपपत्तेक रावश्यकस्वर्गसाधनत्वात्–आदिज्ञानात् एव तत्र प्रवृत्तेः । अयं भावः – सद्योजातस्य शिशोरिदं ज्ञानं न भवति–''अयं मां दुग्धपाने प्रर्वतयति इति'' एवञ्च प्रवर्तना ज्ञानाभावे प्रवृत्तिः न स्यात्, किन्तु दृश्यते च प्रवृत्तिस्तेषामपि । एवं तिरश्चामपि लिङ्गादिश्रवणं तज्ज्ञानं च दुर्लभम् । अतः इष्ट साधनताज्ञानं प्रवृत्तौ कारणं मन्तव्यम् । तच्च फलबलात् जन्मान्तरीयमपि कल्प्यते ।

## सन्दर्भ ग्रन्थ सूची


1. वैयाकरणभूषणसारः (का.22) ।
2. अष्टाध्यायी (3/2/123) ।
3. वैयाकरणभूषणसारः (का.3) ।
4. लघुसिद्धान्तकौमुदी ।
5. अष्टाध्यायी (3/4/69) ।
6. परमलघुमञ्जूषा ।
7. अष्टाध्यायी (3/2/124) ।
8. सिद्धान्तकौमुदी (कारणप्रकरणम्) ।
9. परमसधुमञ्जूषा ।
10. वैयाकरण भूषणसारः ।
11. सिद्धान्तकौमुदी (कारणप्रकरणम्) ।
12. अष्टाध्यायी (7/1/91) ।
13. वैयाकरणभूषणसारः ।

14. परमलघुमञ्जूषा ।
15. परमलघुमञ्जूषा ।
16. परमलघुमञ्जूषा ।
17. वैयाकरणभूषणसारः ।